रक्तशीर्षकः, पुं, ( रक्तं रक्तवर्णं शीर्षं अग्रमस्य । कन् । ) सरलद्रवः । इति रत्नमाला ॥

रक्तशृङ्गिकं, क्ली, विषम् । इति राजनिर्घण्टः ॥

रक्तसंज्ञं, क्ली, ( रक्तमिति संज्ञास्य । ) कुङ्कुमम् । इति त्रिकाण्डशेषः ॥ ( गुणादयोऽस्य कुङ्कुमशब्दे विज्ञेयाः ॥ )

रक्तसन्दंशिका, स्त्री, ( रक्ताय रक्तपानाय सम्यक् दशतीति । दन्श + ण्वुल् । टापि अत इत्वञ्च ।) जलौका । इति राजनिर्घण्टः ॥

रक्तसन्ध्यकं, क्ली, ( "रक्तं सन्ध्येवेति रघुनाथः । रक्तान् सन्धीन् अकति गच्छति व्याप्नोतीति । कः । इति रायमुकुटभरतमल्लिकौ ।") रक्तकह्लारम् । तत्पर्य्यायः । हल्लकम् २ । इत्यमरः । १ । १० । ३६ ॥

रक्तसरोरुहं, क्ली, ( रक्तं सरोरुहम् । ) रक्तपद्मम् । इत्यमरः । १ । १० । ४१ ॥

रक्तसर्षपः, पुं, ( रक्तवर्णः सर्षपः । ) राजिका । इति राजनिर्घण्टः ॥

रक्तसहा, स्त्री, ( रक्तं सहते इति । सह + अच् + टाप् । ) रक्ताम्लानः । इति राजनिर्घण्टः ॥

रक्तसारं, क्ली, ( रक्तवर्णः सारोऽस्य । ) रक्तचन्दनम् । ( यथास्य पर्य्यायः ।

"रक्तचन्दनमाख्यातं रक्ताङ्गं क्षुद्रचन्दनम् ।
तिलपर्णं रक्तसारं तत्प्रवालफलं स्मृतम् ॥"

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥) पत्तङ्गम् । इति राजनिर्घण्टः ॥ (अस्य पर्य्यायो यथा,—

"पत्तङ्गं रक्तसारञ्च सुरङ्गं रञ्जनन्तथा ।
पट्टरञ्जकमाख्यातं पत्तूरञ्च कुचन्दनम् ॥")

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)

रक्तसारः, पुं, ( रक्तः सारो यस्य । ) अम्लवेतसः । रक्तखदिरः । इति राजनिर्घण्टः ॥ ( अस्य पर्य्यायो यथा,—

"खदिरो रक्तसारश्च गायत्री दन्तधावनः ।
कण्टकी बालपत्रश्च बहुशल्यश्च यज्ञियः ॥"

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥ रक्तं सारो यस्येति । शोणितसारयुक्ते, त्रि । यथा, बृहत्संहितायाम् । ६८ । ६७ ।

"ताल्वोष्ठदन्तपालीजिह्वानेत्रान्तपायुकरचरणैः ।
रक्तैस्तु रक्तसारा बहुसुखवनितार्थपुत्त्रयुताः ॥")

रक्तसौगन्धिकं, क्ली, ( रक्तवर्णं सौगन्धिकम् । ) रक्तकह्लारम् । इति जटाधरः ॥

रक्तस्रावः, पुं, ( रक्तं स्रावयतीति । स्रु + णिच् + अच् ।) वेतसाम्लः । इति जटाधरः ॥ ( रक्तस्य स्रावः । ) रक्तपतनम् । (यथा, बृहत्संहितायाम् । ८७ । ३५ ।

"कलहो नैर्ऋतभागे रक्तस्रावोऽथ शस्त्रकोपश्च ।
अपरादेयमेकृतं विनश्यते चर्मकारभयम् ॥")

रक्तहंसा, स्त्री, (रक्ताः वशीभूताः हंसा अत्र ।) रागिणीविशेषः । इति हलायुधः ॥

रक्ता, स्त्री, ( रक्त + टाप् । ) गुञ्जा । ( अस्याः पर्य्यायो यथा,—

"रक्ता सा काकचिञ्ची स्यात् काकानन्ती च रक्तिका ।
काकादनी काकपीलुः सा स्मृता काकवल्लरी ॥"

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥ ) लाक्षा । मञ्जिष्ठा । उष्ट्रकाण्डी । इति राजनिर्घण्टः ॥

रक्ताकारः, पुं, (रक्तवर्णं आकारः अवयवोऽस्य ।) प्रवालः । इति राजनिर्घण्टः ॥ ( विशेषोऽस्य प्रवालशब्दे विज्ञेयः ॥ )

रक्ताक्तं क्ली, (रक्तेन रक्तवर्णेन अक्तं म्रक्षितम् ।) रक्तचन्दनम् । इति जटाधरः ॥ शोणितमिश्रिते, त्रि ॥

रक्ताक्षः, पुं, ( रक्ते लोहिते अक्षिणी अस्य । "अक्ष्णोऽदर्शनात् ।" ५ । ४ । ७६ । इति अच् । ) महिषः । पारावतः । चकोरः । क्रूरः । इति मेदिनी । षे, ४४ ॥ सारसः । इति राजनिर्घण्टः ॥ ( अब्दविशेषः । यथा, बृहत्संहितायाम् । ८ । ५१ ।

"रक्ताक्षमब्दं कथितं तृतीयं
यस्मिन् भयं दंष्ट्रिकृतं गदाश्च ॥" )

रक्तवर्णचक्षुर्युक्ते, त्रि । ( यथा, रामायणे । २ । ८८ । १६ ।

"कथमिन्दीवरश्यामो रक्ताक्षः प्रियदर्शनः ।
सुखभागी न दुःखार्हो शयितो भुवि राघवः ॥"

अयन्तु सदा लक्ष्मीयुक्तो भवेत् । यथा, ज्योतिःसागरे ।

"न श्रीस्त्यजति रक्ताक्षं नार्थः कनकपिङ्गलम् ।
न दीर्घबाहुमैश्वर्य्यं न सौख्यं प्रहसन्मुखम् ॥")

रक्ताङ्गं, क्ली, ( रक्तवर्णमङ्गमस्य । ) विद्रुमः । कुङ्कुमम् । इति मेदिनी । गे, ४८ ॥ (रक्तचन्दनम् । यथा, भावप्रकाशे पूर्ब्बखण्डे प्रथमे भागे ।

"रक्तचन्दनमाख्यातं रक्ताङ्गं क्षुद्रचन्दनम् ।
तिलपर्णं रक्तसारं तत्प्रवालफलं स्मृतम् ॥" )

रक्ताङ्गः, पुं, ( रक्तमङ्गं यस्य । ) मङ्गलग्रहः । कम्पिल्लः । इति मेदिनी । गे, ४७ ॥ ( अस्य पर्य्यायो यथा, वैद्यकरत्नमालायाम् ।

"कम्पिल्लकस्तु रक्ताङ्गो गुण्डारोचनिकेति सा ।"
"कम्पिल्लः कर्कशश्चन्द्रो रक्ताङ्गो रोचनोऽपि च ।"

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमभागे ॥ ) प्रवालः । मत्कुणः । इति राजनिर्घण्टः ॥ मण्डलम् । इति शब्दरत्नावली ॥ (नागविशेषः । यथा, महाभारते । १ । ५७ । १७ ।

"ऋषभो वेगवान्नागः पिण्डारकमहाहनू ।
रक्ताङ्गः सर्व्वसारङ्गः समृद्धः पटवासकौ ॥")

रक्ताङ्गी, स्त्री, ( रक्ताङ्ग + ङीष् । ) जीवन्ती । इति मेदिनी । गे, ४६ ॥ मञ्जिष्ठा । इति भावप्रकाशः ॥

रक्तातिसारः, पुं, ( रक्तं अत्यन्तं सरत्यस्मात् । सृ + घञ् । ) रोगविशेषः । "तस्य संप्राप्तिमाह ।

'पित्तकृत्तु यदात्यर्थं द्रव्यमश्नाति पैत्तिके ।
तदोषाज्जायते शीघ्रं रक्तातीसार उल्बणः ॥'

तस्य चिकित्सा ।

'वत्सकतरुत्वगार्द्रा दाड़िमफलसम्भवा त्वक् ।
त्वग्युगलं पलमानं विपचेदष्टाङ्गसम्मिते तोये ॥
अष्टमभागं शेषं क्वाथं मधुना पिबेत् पुरुषः ।
रक्तातिसारमुल्बणमतिशयितं नाशयेन्नियतम् ॥

इति कुटजदाड़िमक्वाथः ॥ * ॥

'गोदुग्धनवनीतन्तु मधुना सितया सह ।
लीढं रक्तातिसारे तु ग्राहकं परमं महत् ॥'

इति नवनीतावलेहः ॥ * ॥

'पीतं मधुसितायुक्तं चन्दनं तण्डुलाम्बुना ।
रक्तातिसारजिद्रक्तपित्ततृड्दाहमेहनुत् ॥'

चन्दनमत्र श्वेतम् । इति चन्दनकल्कः ॥" इति भावप्रकाशः ॥ ( तथा च ।

"यस्तु रक्तशुद्धविरेचने शोषदाहमतिरिच्यते ।
रक्तातिसार इति विज्ञेयो वैद्यैर्महामतिभिः ॥
धन्वनागरमुस्ता च बालकं बालविल्वकम् ।
बलानागबला चेति क्वाथो रक्तातिसारिणाम् ॥
दाड़िमञ्च कपित्थञ्च पथ्याजम्ब्वाम्रपल्लवान् ।
पिष्ट्वा देया मस्तुयुक्ता रक्तातिसारवारणाः ॥
गुड़ेन पक्वं दातव्यं विल्वं रक्तातिसारिणे ।
मज्जे मधुयुक्ता वा दध्ना रक्तातिसारहाः ॥
वत्सकातिविषनागराभया
पेषितञ्च मधुमस्तुसंयुतम् ।
लेह एव मधुना च मानुषे
रक्तवाहमति वारयत्यपि ॥
कुटजत्वक् च पाठा च त्रिम्बं विल्वञ्च धातकी ।
मधुना सहितं चूर्णं देयं रक्तातिसारहम् ॥
इति रक्तातिसारः ।" इति हारीते चिकित्सितस्थाने तृतीयेऽध्याये ॥ )

रक्ताधारः, पुं, ( रक्तस्याधारः । ) चर्म्म । इति राजनिर्घण्टः ॥

रक्तापहं, क्ली, ( रक्तमपहन्तीति । हन् + डः । ) बोलम् । इति राजनिर्घण्टः ॥

रक्तापामार्गः, पुं, ( रक्तवर्णः अपामार्गः । ) रक्तवर्णापामार्गक्षुपः । राङ्गा आपाङ् इति वङ्गभाषा । लाल चिरचिरी इति हिन्दी भाषा । तत्पर्य्यायः । क्षुद्रापामार्गः २ आघट्टकः ३ दुग्धिनिका ४ रक्तविट् ५ कट्यपत्रिका ६ । अस्य गुणाः । शीतत्वम् । कटुत्वम् । कफवातव्रणकण्डुविषनाशित्वम् । संग्राहित्वम् । वान्तिकारित्वञ्च । इति राजनिर्घण्टः ॥ तत्पर्य्यायगुणाः । अथ आरक्तचिरचिरा ।

"रक्तोऽन्यो वशिरो वृत्तफलो धामार्गवोऽपि च ।
प्रत्यक्पर्णी केशपर्णी कथिता कपिपिप्पली ॥
अपामार्गोऽरुणो वातविष्टम्भी कफहृद्धिमः ।
रूक्षः पूर्ब्बगुणैर्न्यूनः कथितो गुणवेदिभिः ॥
अपामार्गफलं स्वादु रसे पाके च दुर्ज्जरम् ।
विष्टम्भि वातलं रूक्षं वातपित्तप्रसादनम् ॥"

इति भावप्रकाशः ॥

रक्ताम्बरं, क्ली, ( रक्तं रञ्जितमम्बरम् । ) काषायवस्त्रम् । यथा,—